**किरात** पुंस्त्री किरमवस्करादेर्निःक्षेपस्थानं पर्य्यन्तभूमिमतति अत+अण् उप०सं०। १नीचजातिभेदे स च अवस्करनिःक्षेपस्थानपर्य्यन्तदेशाश्रयः व्याधादिः। जातिशब्दे विवृतिः। “तमङ्कुक्ष्णं समारभ्य रामक्षेत्रान्तकं शिवे!। किरातदेशो विज्ञेयो विन्ध्यशैलेऽवतिष्ठते” इति शक्तिसङ्गमोक्ते २देशभेदेषु० भूम्नि। वृहत् सं०कूर्म्मविभागे ३ऐशान्युक्ते ३देशभेदे च “ऐशान्यां मेरुकनष्टराज्यो” पक्रमे “वनराज्यकिरातचीनकौलिन्दाः इत्युक्तम् तद्देशानां राजा अण्। कैरात तद्देशन्त्ये वक्तुपु अणोलुक्। किराताः। ते च क्रमशो वेदानध्ययनादिना वृषलत्वमाप्ता यथाह मनुः “शनकैस्तु क्रियालोपादिमाः क्षुः क्षत्त्रजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च”। पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः। पारदापह्नवाश्चीना किराताःदरदाः खशाः” इति। जातौ स्त्रियां ङीष्। ४मत्स्यभेदे पुंस्त्री० “किरातस्तथा स्त्रियां चामरवाहिन्यां मत्स्यजात्यन्तरे द्वयोः” केशवोक्तेः ५चामरवाहिन्यां स्त्री। “नौसंश्रयां पार्श्वगतां किरातीम्” रघुः “किरातीं—चामरग्राहिणीं दासीम्” मल्लि०। तपस्यदर्ज्जुनप्रसादार्थं किरातरूपेण गतत्वात् ६शिवे तस्य पत्न्यां तथारूपायां ७दुर्गायां स्त्री ङीष् “किराती चीरवसनां चौरसेनानमस्कृताम्। आज्यपां सोमपां सौम्यां सर्व्वपर्व्वतवासिनीम्” हरिवं०१७८अ०दुर्गास्तवे। तत्र व्याघ्रे “मुक्ताफलैः केशरिणां किराताः”“यद्वायुरन्विष्टमृगैःकिरातैः,कुमा०। ८भूमिनिम्बे पुं० राजनि० ९घोटकररक्षके सारस्वतः। १०अल्पतनौ त्रि० मेदि०। “पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्” रत्ना०। अत्र स्वनामसदृशत्वञ्च वानरभिया सङ्कोचितदेहत्वेनाल्पतनुत्वात् स्वनामसमानुपूर्व्वीकपदबोध्याल्पतनुत्वकरणात् पर्य्यन्ताश्रयित्वविशेषणाद्वा तथात्वम् तत्र भूनिम्बगुणाद्युक्तं भावप्र० यथा “किरातः सारको रूक्षः-शीतलस्तिक्तको लघुः। सन्निपातज्वरश्वासकफपित्तास्रदाहनुत्। कासशोथतृषाकुष्ठ ज्वरव्रणक्रमिप्रणुत्। स्वार्थे क। किरातक भूमिनिम्बे राजनि०। किरातं शिवमधिकृत्य कृतोग्रन्थः अण् कैरात भारतवनपर्व्वान्तर्गतेऽवान्तर पर्व्वभेदे तत्रत्यकथा भा०व०३९अ० यथा

“गतेषु तेषु सर्व्वेषु तपस्विषु महात्मसु। पिनाकपाणिर्भगवान् सर्व्वपापहरो हरः। कैरातं वेशमास्थाय काञ्चनद्रुमसन्निभम्। विभ्राजमानो विपुलो गिरिर्मेरुरिवापरः। श्रीमद्धनुरुपादाय शरांश्चाशीविषोपमान्। निष्पपात महावेगो दहनो देहवानिव। देव्या सहोमया श्रीमान् समानव्रतवेशया। नानावेशधरैर्हृष्टैर्भूतैरनुगतस्तदा। किरातवेशसंछन्नः स्त्रीभिश्चापि सहस्रशः। अशोभत तदा राजन्! स देशोऽतीव भारत!। क्षणेन तद्वनं सर्व्वं निःशब्दमभवत्तदा। नादः प्रस्रवणानाञ्च पक्षिणाञ्चाप्युपारमत्। स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः। मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम्। वाराहं रूपमास्थाय तर्जयन्तमिवार्ज्जुनम्। हन्तुं परमदुष्टात्मा तमुवाचाथ फाल्गुनः। गाण्डीवं धनुरादाय शरांश्चाशीविषोपमान्। सज्यं धनुर्वरं कृत्वा ज्याघोषेण निनादयन्। यन्मां प्रार्थयसे हन्तुमनागसमिहागतम्। तस्मात्त्वां पूर्व्वमेवाहं नेताऽद्य यमसादनम्। दृष्ट्वा तं प्रहरिष्यन्तं फाल्गुनं दृढधन्विनम्। किरातरूपी सहसा वारयामास शङ्करः। मयैष प्रार्थितः पूर्व्वमिन्द्रकीलसमप्रभः। अनादृत्य च तद्वाक्यं प्रजहाराथ फाल्गुनः। किरातश्च समं तस्मिन्नेकलक्ष्ये महाद्युतिः। प्रमुमोचाशनिप्रख्यं शरमग्निशिखोपमम्। तौ मुक्तौ सायकौ ताभ्यां समं तत्र निपेततुः। मूकस्य गात्रे विस्तीर्णे शैलसंहनने तदा। यथाऽशनेर्व्विनिर्घोषो वज्रस्येव च पर्व्वते। तथा तयोः सन्निपातः शरयोरभवत्तदा। स विद्धो बहुभिर्व्वाणैर्दीप्तास्यैः पन्नगैरिव। ममार राक्षसं रूपं भूयः कृत्वा विभीषणम्। स ददर्श ततो जिष्णुः पुरुषं काञ्चनप्रभम्। किरातवेशसंछन्नं स्त्रीसहायममित्रहा। तमब्रवीत् प्रीतमनाः कौन्तेयः प्रहसन्निव। को भवानटते शून्ये वने स्त्रीगणसंवृतः। न त्वमस्मिन् वने घोरे बिभेषि कनकप्रभ!। किमर्थञ्च त्वया विद्धो वराहो मत्परिग्रहः। मयाऽभिपन्नः पूर्व्वं हि राक्षसोऽयमिहागतः। कामात् परिभवाद्वाऽपि न मे जीवन् विमोक्ष्यसे। न ह्येष मृगयाधर्म्मो यस्त्वयाऽद्य कृतो मयि। तेन त्वां भ्रंशयिष्यामि जीवितात् पर्वताश्रयम्। इत्युक्तः पाण्डवेयेन किरातः प्रहसन्निव। उवाच श्लक्ष्णया वाचा पाण्डवं सव्यसाचिनम्। न मत्कृते त्वया वीर! भीः कार्य्या वनमन्तिकात्। इयं भूमिः सदाऽस्माकमुचिता वसतां वने। त्वया तु दुष्करः कस्मादिह वासः प्ररोचितः?। वयन्तु बहुसत्वेऽस्मिन्निवसामस्तपोधन!। भवांस्तु कृष्णवर्णाभः सुकुमारः सुखोचितः। कथं शून्यमिमं देशमेकाकी